दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-10 ■ वर्ष-4 ■ अङ्क-355 | 1 | अक्तूबर, 20 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णचतुर्दशी
कार्तिक ०४ प्रविष्टांशः मङ्गलमयः भवेत्


2 जीएसटीपरिष्कारेण भारते षट् विंशत्यधिक द्विसहस्रतमवर्षपर्यन्तं प्रायः पंच सहस्र नूतनव्यवसायस्य उत्पत्तिः भविष्यति-प्रधानमन्त्री

3 हिमाचलप्रदेशे मन्त्रिमण्डलविस्तारस्य चर्चाः दीपावलीपश्चात् तीव्राः भविष्यन्ति, यतः त्रयाणां पदानाम् नियुक्तिः सम्भवति

05 तः 10 पृष्ठे दीपावलीविशेषांकः


## सुभाषितम्

**व्यसनं प्राप्य यो मोहात्,**
**केवलं परिदेवयेत्।**
**क्रन्दनं वर्धयत्येव,**
**तस्यान्तं नाधिगच्छति॥**

अर्थात्- कष्ट आने पर जो मनुष्य मूढ़ता के कारण केवल क्रंदन करते हुए दुःख ही करता रहता है, वह अपने दुःख को ही बढ़ाता है। उसके दुःख का अन्त नहीं हो सकता।

## बिहारविधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय द्वाविंशत्युत्तरशत-निर्वाचनक्षेत्रेषु नामाङ्कन-पञ्जीकरण-प्रक्रिया युद्धस्तरे प्रचलति




**हिमसंस्कृतवार्ताः।** बिहारविधानसभानिर्वाचनस्य द्वितीयान्तिमचरणाय द्वाविंशत्युत्तरशत-निर्वाचनक्षेत्रेषु नामाङ्कन-पञ्जीकरण-प्रक्रिया जायमाना वर्तते। एतस्मै चरणाय नामाङ्कनस्य अन्तिमा तिथिः अस्ति। राज्यस्य विंशति-जनपदानां द्वाविंशत्युत्तरशत-विधानसभा-क्षेत्रेषु नवम्बरमासस्य एकादश-दिनाङ्के मतदानं भविष्यति। प्रत्याशिनः अक्टूबर-मासस्य त्रयोविंशति दिनाङ्क यावत् स्वनामाङ्कनं प्रत्यावर्तितुं शक्नुवन्ति। प्रथमचरणाय अपि नामाङ्कन-प्रत्यावर्तनस्य अन्तिमा तिथिः अस्ति, यत्र एकविंशत्युत्तरशतम् विधानसभा क्षेत्राणि समाविष्टानि सन्ति। भारतीयजनता पार्टीति-दलेन तथा जनतादलेन निर्वाचन प्रचारार्थं स्वकीयाः वरिष्ठ-प्रचारकाः विनियोजिताः। दीपावली पर्वणः अनन्तरं प्रचारः तीव्रतरः भविष्यतीति आशास्यते। अत्रान्तरे राज्ये स्वतन्त्र-निष्पक्ष निर्वाचनार्थं आरक्षकाः तथैव विभिन्नानि प्रवर्तनाभिकरणानि कठोरतया निरीक्षणं कुर्वन्ति। आयकर विभागः, राज्य-आरक्षक-विभागः तथा मद्य-विभागश्च कठोर-कार्याचरणाय प्रयतन्ते। अक्टूबर-मासस्य षष्ठे दिनाङ्के आदर्शाचार-संहितायाः कार्यान्वयनानन्तरं अधिकारिभिः द्वि-दशमलव-त्रिसप्ततिकोटि-रूप्यकाणां धनराशिः, द्वाविंशतिकोटि-रुप्यतोऽप्यधिका मदिरा, षोडश-दशमलव-एकविंशति-कोटिरूप्यकेभ्यः अपि अधिकानि मादक द्रव्याणि, अथ च पञ्चकोटि-रूप्यतोऽप्यधिकाः धातवः अधिगृहीताः। एतदतिरिच्य मतदातृभ्यः प्रदीयमानाः द्वादश-कोटि-रूप्यकाणां उपहाराः अपि स्वायत्तीकृताः।


प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


## उत्तर-प्रदेशस्य अयोध्या नगरे दीपावली पर्वणः पूर्व-सन्ध्यायां भव्यदीपोत्सवः



हिमसंस्कृतवार्ताः। उत्तर-प्रदेशस्य अयोध्या नगरे दीपावली पर्वणः पूर्व-सन्ध्यायां भव्यदीपोत्सवः आयोजयिष्यते। उत्तरप्रदेश-सर्वकारः रामस्य पैडी-स्थलं समेत्य अयोध्यायाः षट्पञ्चाशत्-घट्टेषु षड्विंशति-लक्षाधिकान् दीपकान् प्रज्वाल्य गिनीज़-विश्व-कीर्ति-स्थापनार्थं लक्ष्यं स्थापयिष्यति। अस्मिन् वर्षे अपरां विश्व-कीर्ति निर्मातुं प्रयासः करिष्यते, यस्मिन् एकविंशति-शतं वेदाचार्याः सरयू-नद्याः तटे महानीराजनं करिष्यन्ति तथा श्लोकानां पाठं करिष्यन्ति। राज्यपालः आनन्दीबेन पटेलः, मुख्यमन्त्री योगी-आदित्यनाथः तथा अन्ये बहवः मन्त्रिणः च एतस्य कार्यक्रमस्य शोभां वर्धयिष्यन्ति।

## भारतेन स्वकीयं प्रथमं स्वदेशी-प्रतिजैविकम्, 'नैफिथ्रोमाइसिन्' इति, विकासितम्-डॉ. जितेन्द्र सिंहः



**हिमसंस्कृतवार्ताः।** केन्द्रीय-विज्ञान-प्रौद्योगिकी-मन्त्री डॉ. जितेन्द्र सिंहः अवदत् यत् भारतेन स्वकीयं प्रथमं स्वदेशी-प्रतिजैविकम्, 'नैफिथ्रोमाइसिन्' इति, विकासितम्। एतत् तावत् देशस्य औषध-जैवप्रौद्योगिकी-क्षेत्रयोः आत्मनिर्भरतादिशि महत्त्वपूर्णोपलब्धिः वर्तते। डॉ. सिंहः अवदत् यत् एतत् प्रतिजैविकम् प्रतिरोधक श्वसन-सङ्क्रमणेषु प्रभावकारकमस्ति । विशेषतः कर्करोगग्रस्तेभ्यः रोगिभ्यः अपि लाभप्रदं वर्तते । नवदिल्ल्यां त्रिदिवसीय चिकित्सा-कार्यशालायाः उद्घाटनावसरे मन्त्रिणा हीमोफीलिया इत्यस्य उपचारे जीन-चिकित्सायाः कृते स्वदेशी-नैदानिक-परीक्षणस्य अन्या महती वैज्ञानिकोपलब्धिः अपि प्रकाशिता ।


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११


## नवदेहली-रेलस्थानके निर्मितं होल्डिङ्ग-क्षेत्रम् यात्रिकानुभवं उत्तमतया परिष्करोति-केन्द्रीय रेल्मन्त्री अश्विनी वैष्णवः



**हिमसंस्कृतवार्ताः।** केन्द्रीय रेल्मन्त्री अश्विनी वैष्णवः अवोचत् यत् नवदेहली-रेलस्थानके निर्मितं होल्डिङ्ग-क्षेत्रम् यात्रिकानुभवं उत्तमतया परिष्करोति।। श्री वैष्णवः गतरात्रौ उत्सवावधौ रेलस्थानके जनसञ्चयस्य निरीक्षणं कुर्वन् आसीत्। मन्त्री अवदत् यत्, यात्रि-सुविधा-केन्द्रस्य भागस्य होल्डिङ्ग-क्षेत्रे अनेकानि चिटिका-केन्द्राणि, शौचालयाः च सन्ति, येन यदि प्रायः पंचसप्तति सहस्राधिकाः जनाः उपस्थिताः भवेयुः चेदपि यात्रिकाणां सुगम-सञ्चारः सम्भवति। सः एतदपि अकथयत् यत् अत्यधिक जनसम्मर्दः सत्यपि रेल्-कर्मचारिणः सुगम-प्रचालनं, यात्रिकाणां सुलभतां च सुनिश्चेतुम् अहर्निशं कार्यं कुर्वन्तः सन्ति। श्री वैष्णवः इतोऽपि संसूचयत् यत् उत्सवावधौ अशेषे देशे प्रायः द्वादश सहस्राणि विशिष्टानि रेलयानानि प्रचलन्ति इति। मन्त्री लघु-नियन्त्रण-कक्षम् अपि अगच्छत्, यस्मात् सम्पूर्ण स्थले स्थापितानां सी. सी. टी. वी.-चित्रयन्त्राणां साहाय्येन सुरक्षा-निरीक्षणं भवति। अत्रान्तरे, बिहार-उत्तरप्रदेश-समेत्य उत्तरभारतस्य विभिन्नानां गन्तव्यस्थानानां कृते शतशः विशिष्ट रेलयानानि सन्ति। दीपावली -छठ्-पूजयोः समये भक्तानां यात्रिकाणां च सुगमं सुखप्रदं च यात्रां सुनिश्चेतुम् अस्य कार्यस्य उद्देश्यं वर्तते।

# बालाश्रमेषु निवसतां बालकानां कृते क्रीडादिवसस्य आयोजनं भविष्यति मुख्यमंत्रिणा सुक्खुना कृता घोषणा



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंह सुक्खुः रविवासरे शिमलाया टूटीकण्डीबालाश्रमं गत्वा तत्र निवसतां बालकैः सह दिवालीम् आचरितवान्। आश्रमस्य बालकाः, कर्मचारिणः च मृत्तिकादीपं प्रज्वालय रङ्गिणः सांस्कृतिकप्रदर्शनानि च कृत्वा मुख्यमन्त्रिणः स्वागतं कृतवन्तः। मुख्यमन्त्री बालकानां कृते मिष्टान्नं उपहारं च वितरितवान्, तेभ्यः च हृदयेन दीवाली अभिवादनं कृतवान्। मुख्यमन्त्री उक्तवान् यत् दीपावल्याः यथार्थः अर्थः सुखं, करुणा, एकतां च सहभागिकर्तुं भवति। एते बालकाः अस्माकं भविष्याः सन्ति, तेषां पालनं प्रेम्णा, सम्मानेन, समुचितावकाशैः च भवतु इति अस्माकं सामूहिकं दायित्वम् अस्ति। सः अवदत् यत् राज्यसर्वकारेण अनाथबालानां "राज्यस्य बालकाः" इति दत्तकं गृहीतम्। तेषां शिक्षायाः सर्वं व्ययः सर्वकारः वहति। तदतिरिक्तं तेभ्यः १००० रुप्यकाणां कोशधनमपि प्रदत्तं भवति। प्रतिमासं ४,००० रुप्यकाणि भवन्ति। राज्यस्य अनाथालयेषु आवासीयसुविधानां उन्नयनं भविष्यति, अन्यसुविधानां अपि वर्धनं भविष्यति इति सः अवदत्। मुख्यमंत्री सुक्खुः अवदत् यत् अनाथानाम्, दुर्बलबालानां च समग्रविकासाय विशेषतया नूतनाः कल्याणकारीयोजनाः सर्वकारः शीघ्रमेव प्रारभ्यते। मुख्यमन्त्री घोषितवान् यत् प्रतिवर्षं नवम्बरमासस्य १४ दिनाङ्के अनाथालयस्य बालकानां कृते क्रीडादिवसस्य आयोजनं भविष्यति, यस्य कृते राज्यसर्वकारः पर्याप्तं बजटं विनियोजयिष्यति।मुख्यमन्त्री उक्तवान् यत् अनाथालयेभ्यः छात्रान् उत्तमानुभवं प्राप्तुं राज्यात् बहिः शैक्षणिकभ्रमणार्थं प्रेषिताः भविष्यन्ति। सः बालकानां कृते आग्रहं कृतवान् यत् ते अध्ययनं प्रति ध्यानं ददतु, ततः विभिन्नासु क्षमतासु राष्ट्रसेवां कृत्वा देशस्य वैभवं आनयन्तु।

# राज्यपालः, मुख्यमन्त्री, उपमुख्यमन्त्री च राज्यस्य जनेभ्यः दीपावल्याः शुभकामनाः अयच्छन्



हिमसंस्कृतवार्ताः- शिमला। राज्यपालः शिवप्रतापशुक्लः, मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः, उपमुख्यमन्त्री मुकेश अग्निहोत्री च राज्यस्य जनेभ्यः दीपावल्याः शुभकामनाः अयच्छन्। दीपावल्यां राज्यजनानाम् आरोग्यं समृद्धिं च कामयन् राज्यपालः अवदत् यत् प्रकाशस्य अयं उत्सवः दुष्टतायाः उपरि शुभस्य, अन्धकारस्य उपरि प्रकाशस्य, अज्ञानस्य उपरि ज्ञानस्य च विजयस्य प्रतीकः अस्ति। अस्मिन् दिने न केवलं गृहाणां अलङ्कारार्थं अपि तु जीवनस्य गहनसत्यस्य बोधनाय दीपाः प्रज्वलिताः भवन्ति। मुख्यमंत्री सुखविन्दसिंहसुक्खुः अभिनन्दनसन्देशे उक्तवान् यत् दीवालीपर्व न केवलं गृहाणि अपि तु अस्माकं मनः समाजं च प्रकाशयति। सः राज्यस्य जनानाम् आह्वानं कृतवान् यत् ते अस्य अवसरस्य उपयोगेन शान्ति-सौहार्द-एकतायाः सन्देशं प्रसारयन्तु, समृद्धं, उज्ज्वलं च राज्यं निर्मातुं प्रतिज्ञां कुर्वन्तु। दिवाली-मङ्गलावसरे राज्यस्य जनानां सुख- जीवन- समृद्धिकामनाम् अकरोत्। उपमुख्यमन्त्री मुकेश अग्निहोत्री स्वसन्देशे उक्तवान् यत् दीपावलीपर्वः अस्मान् प्रेम्णः, सौहार्दस्य, भ्रातृत्वस्य च सन्देशं ददाति। सः राज्यस्य जनेभ्यः आग्रहं कृतवान् यत् ते एतत् उत्सवं परस्परं सौहार्दस्य भावेन आचरन्तु येन सर्वेषां जीवने सुखस्य प्रकाशः प्रसरेत्।

# जीएसटीपरिष्कारेण भारते षट् विंशत्यधिक द्विसहस्रतमवर्षपर्यन्तं प्रायः पंच सहस्र नूतनव्यवसायस्य उत्पत्तिः भविष्यति-प्रधानमन्त्री




**हिमसंस्कृतवार्ताः।** प्रधानमन्त्रिणा नरेन्द्रमोदिना घोषितं यत्, गतमासस्य द्वादश दिनाङ्के प्रारब्धं जी. एस्. टी. बचत-उत्सवः, समाजस्य सर्ववर्गेभ्यः जनेभ्यः लाभप्रदो वर्तते । नागालैण्ड्-राज्यस्य अर्थव्यवस्थायां जी. एस. टी. परिष्कारः बहुविध उद्योगेषु कर-मूल्यांकनं तर्कसङ्गतं करोति राज्यस्य अर्थव्यवस्थां सुदृढां कर्तुं महत्त्वपूर्णं पदं निर्दिशति। एते परिष्काराः सर्वसमावेशकविकासाय, शिल्पकाराणां, कृषकाणां, सूक्ष्म-उद्यमानां च सशक्तीकरणाय अवसरम् आनयेयुः। जी. एस्. टी. द्वादश प्रतिशततः अपचीय पंचप्रतिशतं यावत् अभवत्। प्रायः द्वादशशत लघुधारकाः, एम्. एस्. एम्. ई. इत्येते च जी. एस्. टी.-परिष्कारैः अधिक-लाभान् प्राप्नुयुः।सिमेण्ट्-क्षेत्रे जी. एस्. टी. इत्यस्य अष्टादश प्रतिशतं यावत् न्यूनीकरणेन निर्माणव्ययः न्यूनीकृतः । जनजातीयानां वनशिल्पानां च जी. एस्. टी. इत्यस्य पंच प्रतिशतं न्यूनीकरणेनविपणीषु दशतः पंचदश प्रतिशतं वृद्धिः अभवत्, सममेव षट् विंशत्यधिक द्विसहस्रतमवर्षपर्यन्तं प्रायः पंच सहस्र नूतनव्यवसायस्य उत्पत्तिः भविष्यति इति सम्भाव्यते।

# श्रीलक्ष्मि ! नारायणि !



**✍ 'कविताशशांक'कोरिडे विश्वनाथ शर्मा , धर्मपुरि , तेलंगाणा**

श्रीमच्छुभ्रगिरींद्रसूनुविलसद्दिव्याननानंददं !
त्र्यक्षंरंजित शौर्य वीर्य समरं शैलेशसत्त्वान्वितम् .
पंकेजासनपाकशासनमुखोपास्यं मुदादौ सदा
नत्त्वा तं गणनायकं सुशतकां लक्ष्म्याः करोमि स्तुतिम् ..
(वंदे तं गणनायकं निरवधिकं विघ्नांधविध्वंसिनम्)

चंचद्वार्धितरंगरंगविलसद्पद्मोद्भवे ! चंचले !
चंचद्वारिजपत्रनेत्रयुगळे ! चंचत्स्वभावात्मिके !
चंचत्कालनियंत्रशक्तिविभवे ! चंचन्मनोरोधके !
चंचज्ज्योतिषचक्रराजफलदे श्रीलक्ष्मि ! नारायणि !

भ्राजत्सुंदरनीलकुंतलजटान्यक्कारितभ्रामरे !
भ्राजत्सुंदरपादपद्मयुगळन्यक्कारिताब्जप्रभे !
भ्राजत्सुंदरवक्त्रबिंबलसितन्यक्कारितेंदुद्युते !
भ्राजच्छ्रीहरिहृन्निवासिनि ! भजे श्रीलक्ष्मि नारायणि !

# मुख्यमंत्रिणः सुखविंदरसिंहसुक्खोः बजटघोषणाः सम्पन्ना न वा, प्रशासनिकसचिवेभ्यः विवरणं याचितम्

हिमसंस्कृतवार्ताः- शिमला। अस्य वित्तवर्षस्य प्रथमार्धे सम्पन्नस्य मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः बजटघोषणानां प्रतिक्रियां दातुं सर्वेभ्यः प्रशासनिकसचिवेभ्यः कथितम् अस्ति। राज्यसर्वकारस्य वित्तविभागेन अस्मिन् विषये सर्वेभ्यः प्रशासनिकसचिवेभ्यः विवरणं याचितम् अस्ति। सम्बन्धितविवरणेषु प्रशासनिकसचिवैः सह अक्तूबर २७ दिनाङ्के चर्चा भविष्यति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सोमवासरे स्वस्य बजटघोषणानां समीक्षायै सभां आहूतवान्। नवमुख्यसचिवः संजयगुप्ता प्रथमवारं प्रशासनिकप्रमुखत्वेन अस्मिन् सत्रे उपस्थितः भविष्यति। दीपावलीपश्चात् राज्यसर्वकारः मुख्यमंत्रिणः सुक्खोः बजटघोषणानां समीक्षां करिष्यति। मुख्यमन्त्री २०२५ तमस्य वर्षस्य मार्चमासस्य १७ दिनाङ्के स्वस्य कार्यकालस्य तृतीयं बजटं प्रस्तुतवान्। २०२५-२६ वित्तवर्षस्य अस्मिन् बजटभाषणे मुख्यमन्त्री २१९ बिन्दुषु केन्द्रितः आसीत्। मुख्यमंत्रिणा सुक्खुना ₹58,514 कोटिरूप्यकाणां वार्षिकं बजटं प्रस्तुतम्। मुख्यमन्त्री स्वस्य बजटघोषणासु ग्रामीण- अर्थव्यवस्थां वर्धयितुं कृषि-उद्यान-पशुपालनं, तत्सम्बद्धक्षेत्राणां विकासं, विस्तारं च घोषितवान् पर्यटन, समाजकल्याण, स्वरोजगार, हरित ऊर्जा, स्वास्थ्यं, स्वच्छपेयजलं, परिवहनम्, उद्योगः, मार्गः एवं सेतु, उद्योगं, ग्रामीणविकासः, पंचायतीराजः, नगरविकासः, राजस्वम्, आपदाप्रबंधनं, तथा कर्मचारिभ्यः सम्बद्धाः अनेकाः घोषणाः अकरोत्। एतासु कति घोषणाः सम्पन्नाः, कति अपूर्णाः अवशिष्टाः इति निर्धारयितुं विस्तृतपरामर्शः भविष्यति।

## दिसम्बरमासात् पूर्वं ग्रामीणघोषणाः सम्पन्नां कर्तुं ध्यानं दत्तव्यम्

पंचायतनिर्वाचनं मनसि कृत्वा अधिकांशं ग्रामीणघोषणा दिसम्बरमासात् पूर्वं सम्पन्नं कर्तुं ध्यानं दीयते। दिसम्बरमासस्य अनन्तरं कदापि पंचायतनिर्वाचनं सम्भवति। काङ्ग्रेसः पंचायतीराजसंस्थासु स्वस्य सामर्थ्यं प्रदर्शयितुं अस्य वित्तवर्षस्य मुख्यमन्त्रिणः बजटघोषणाम् अपि समये एव कार्यान्वितुं प्रयतते।

# HP Weather: अक्तूबरमासस्य विंशतितमदिनान्तं यावत् आकाशः निर्मलः भविष्यति, एकविंशतितमे द्वाविंशतितमे च दिने उच्चप्रदेशेषु वर्षा-हिमवृष्ट्योराशंका



हिमसंस्कृतवार्ताः- शिमला।पश्चिमविक्षोभस्य सक्रियतया वातावरणे परिवर्तनस्य सम्भावना दृश्यते। शनिवासरे सुन्दरनगरनाम्नि स्थाने प्रातःसायं च धूम्रावरणं दृष्टम्। तस्मात् दृश्यता शतमीटरपर्यन्तं सीमिता आसीत्। राजधानी शिमलासहितेषु अन्येषु भागेषु आकाशः निर्मलः आसीत्। ऊनायां अधिकतमतापमानं त्रयस्त्रिंशद् डिग्रीसेल्सियस् इति मापनं कृतम्। ऋतुविज्ञानकेन्द्रस्य (शिमला) अनुसारं, एकविंशतितमदिनं प्रति दुर्बलः पश्चिमविक्षोभः पश्चिमहिमालयप्रदेशं प्रभावितं करिष्यति। तस्य प्रभावेन एकविंशतिदिने द्वाविंशतिदिने च राज्यस्य उच्चप्रदेशेषु कतिपये स्थानेषु लघुवर्षा-हिमवृष्ट्योः सम्भावना अस्ति। तस्मिन् समये चम्बा, किन्नौरम्, लाहौलस्पीतिः इत्येतेषु जनपदेषु लघुवृष्टयः सम्भाव्यन्ते। एकोनविंशतिदिने विंशतिदिने च त्रयोविंशतिचतुर्विंशतिदिनयोः च सम्पूर्णे प्रदेशे आकाशः निर्मलः भविष्यति इति पूर्वानुमानम्।शुक्रवासररात्रौ शिमलायां न्यूनतमतापमानं १५.०, कल्पायां ५.२, धर्मशालायां ११.८, ऊनायां १४.०, नाहने १६.५, केलाङ्गे ०.८, सोलने ११.२, मनाल्यां ७.२, काङ्गड़ायां १३.५, मण्ड्यां १४.०, बिलासपुरे १६.२, हमीरपुरे १३.८, कुकुमसेरी २.०, नारकण्डायां ९.५, भरमौरे १०.८, रिकाङ्गपियो ८.४, पौंटासाहिबे २०.०, देहरगोपीपुरे १७.०, ताबौ ३.४, बजौरायां १०.० डिग्रीसेल्सियस इति मापनं जातम्।

# हिमाचलप्रदेशे मन्त्रिमण्डलविस्तारस्य चर्चाः दीपावलीपश्चात् तीव्राः भविष्यन्ति, यतः त्रयाणां पदानाम् नियुक्तिः सम्भवति




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलकाङ्ग्रेसस्य नूतनस्य अध्यक्षस्य उद्घाटनेन मन्त्रिमण्डलविस्तारस्य चर्चाः अपि तीव्राः अभवन् । मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः संकेतं दत्तवान् यत् पञ्चदशदिनान्तरे नूतनाध्यक्षस्य नियुक्तिविषये निर्णयः भविष्यति।

एकं मन्त्रिमण्डलस्थानं पूर्वमेव रिक्तम् अस्ति। शिक्षामन्त्री रोहितठाकुरः पदस्य स्पर्धां कुर्वन् अस्ति। यदि रोहितः अध्यक्षः नियुक्तः भवति तर्हि मन्त्रिपदद्वयं रिक्तं भविष्यति। एकस्य मन्त्रिणः निष्कासनस्य अपि चर्चा अस्ति ।

अस्मिन् परिदृश्ये त्रयः नूतनाः मन्त्रिणः नियुक्ताः भवितुम् अर्हन्ति, तेषां विभागेषु अपि परिवर्तनं भवितुम् अर्हति । एतादृश्यां राजनैतिकस्थितौ मन्त्रिमण्डलस्य विस्तारस्य अत्यन्तं सम्भावना वर्तते।

## अन्तिमवर्षद्वये सर्वकारः नवीनं उत्साहं याचते

डिसेम्बरमासे सर्वकारस्य त्रिवर्षीयं सत्ताकार्यं समाप्तं भवति, शेषद्वये वर्षे राज्यस्य जनानां कृते नवीनतया उत्साहेन गन्तुं मार्गं प्रशस्तं कर्तुम् इच्छति सत्ताधारी काङ्ग्रेसपक्षः।अधुना मुख्यमन्त्री सुखुः सप्त लक्ष्याणि निर्धारितवान्, यत्र शिक्षा, स्वास्थ्यं च सर्वोच्चप्राथमिकता अस्ति। मुख्यमन्त्री स्वयं नियमितरूपेण एतयोः विभागयोः समीक्षां करोति ।मन्त्रिमण्डलविस्तारस्य सम्भावना तदा एव उत्पद्यते यदा राज्यसर्वकारस्य शिक्षामन्त्री रोहितठाकुरः काङ्ग्रेसस्य अध्यक्षः भवति। तस्मिन् सति मन्त्रिमण्डलस्य पदद्वयं रिक्तं भविष्यति। कर्णलः धनीरामशण्डिलः स्वपुत्रस्य सक्रियराजनीत्यां संलग्नतायाः विनिमयरूपेण काङ्ग्रेस-उच्चनेतृत्वाय मन्त्रीपदं दातुं स्वस्य इच्छां प्रकटितवान् अस्ति।

## शाण्डिलस्य पुत्रस्य निगमस्य वा बोर्डस्य वा अध्यक्षत्वेन नियुक्तेः चर्चा

धनीरामशाण्डिलस्य पुत्रस्य निगमस्य वा बोर्डस्य वा अध्यक्षत्वेन नियुक्तेः चर्चा अभवत् । तस्मिन् सति मन्त्रिपदत्रयं पूरयिष्यते । काङ्ग्रेसस्य राजनैतिकरणनीत्या शिमलासंसदीयनिर्वाचनक्षेत्रं प्राधान्यं दातव्यम् इति निर्दिशति । अस्य पृष्ठतः कारणम् अस्ति यत् अस्मिन् प्रदेशे त्रयः अपि जनपदाः काङ्ग्रेसस्य बहुधा समर्थनं कृतवन्तः । पूर्वनिर्वाचनेषु अपि शिमलासंसदीयनिर्वाचनक्षेत्रं काङ्ग्रेसपक्षं तुल्यकालिकरूपेण सम्यक् निराशं न कृतवान्।

## कुलदीपसिंह पठानिया मन्त्रिमण्डले सम्मिलिते सति संजयरत्नः विधानसभाध्यक्षः भविता

यदि विधानसभाध्यक्षः कुलदीपसिंहपठानिया मन्त्रिमण्डले नियुक्तः भवति तर्हि संजयरत्नः अध्यक्षपदं स्वीकुर्यात्, काङ्गड़ाक्षेत्रात् अन्यः मन्त्री नियुक्तः भविष्यति। सम्प्रति चन्द्रकुमारः यादवेन्द्रगोमा च काङ्गड़ा निर्वाचनक्षेत्रस्य मन्त्रिमण्डलमन्त्रिणः सन्ति । आर.एस. बाली मन्त्रिमण्डलपदं धारयति। संजयरत्नः काङ्गड़ामण्डलस्य अस्ति, अतः संतुलनं निर्वाहयति ।

## मण्डीसंसदीयनिर्वाचनक्षेत्राय अपि पदं प्राप्स्यते

मन्त्रिमण्डलविस्तारस्य सन्दर्भे मण्डीसंसदीयक्षेत्रस्य सर्वकारे पदं प्राप्तुं बहु सम्भावना वर्तते। कुल्लूमण्डलस्य वरिष्ठः काङ्ग्रेसनेता सुन्दरठाकुरः मन्त्रिपदार्थं विचार्यते। मण्डीमण्डलस्य एकमात्रः काङ्ग्रेसविधायकः चन्द्रशेखरः मुख्य सचेतकरूपेण नियुक्तः भवितुम् अर्हति। सम्प्रति केवलसिंह पठानिया उपमुख्य सचेतकः अस्ति।

## शिमलासंसदीयनिर्वाचनक्षेत्रे मन्त्रीपदं प्राप्तुं सम्भावना

यदि कर्णल धनीरामशाण्डिलः स्वेच्छया मन्त्रिमण्डलं त्यजति तर्हि अर्की निर्वाचनक्षेत्रस्य विधायकः संजय अवस्थी नियुक्तः भवितुम् अर्हति। अस्य पृष्ठतः तर्कः अस्ति यत् जातिसमीकरणानाम् आधारेण हमीरपुरमण्डले भोरञ्जविधानसभासनस्य प्रतिनिधित्वं कुर्वन् सुरेशकुमारः मुख्यमन्त्रीगृहमण्डलस्य अस्ति। जातिसमीकरणानि विचार्य विधानसभायाः उपसभापतिः विनयकुमारः सिरमौरमण्डलस्य रेणुकाविधानसभाक्षेत्रस्य निवासी अस्ति, सः मन्त्रिमण्डलमन्त्री हर्षवर्धनचौहानस्य समीपस्थस्य निर्वाचनक्षेत्रस्य अस्ति। शिमलामण्डले रामपुरासनतः वरिष्ठः काङ्ग्रेसविधायकः नन्दलालः पूर्वमेव राज्यवित्त-आयोगस्य अध्यक्षत्वेन मन्त्रिमण्डलपदं धारयति। अतः अनुसूचितजातिवर्गे महत्त्वपूर्णः प्रभावः न भविष्यति।

# हिन्दुसनातनपरम्परायां महत्पर्व -दिपावली

*त्वं ज्योतिस्त्वं रविश्चन्द्रो*
*विद्युदग्निश्च तारकाः ।*
*सर्वेषां ज्योतिषां ज्योतिर्*
*दीपावल्यै नमो नमः ।।*



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

भारतीय-सनातन-संस्कृतेः संरक्षणाय, संवर्धनाय च अनादिकालतो हि व्रतपर्वाणां भूमिका महत्तमा । अस्माकं धर्मशास्त्रेषु आत्मोन्नत्यर्थम् एवं मोक्षप्राप्त्यर्थं च सर्वोत्तमं सहजं च विविधं साधनम् उल्लेखितमस्ति, यच्च विधिपूर्वकं समाचरणीयं भवति । विविधेषु व्रतपर्वसु दीपावलीपर्व अन्यतमम् । एतस्य पर्वणो विषये अत्र किञ्चित् प्रकाशयितुं प्रयत्यते ।

भारतवर्षे मन्यमानेषु सर्वेषु पर्वसु दीपावलीपर्व सामाजिकदृष्ट्या धार्मिकदृष्ट्या च अप्रतीमं महत्त्वपूर्णं चास्ति इत्यत्र न सन्देहः । सामाजिकदृष्ट्या एतस्य महत्त्वं यत् पर्वणः आगमनात् पूर्वं हि जनाः स्वगृहस्य स्वच्छताविषये अवधानतां दद्युः, गृहाभ्यन्तरबहिर्भागयोः मालिन्यं दूरीकुर्युः, गृहभित्तिद्वारादिषु वर्णलेपनम्, अङ्गणे शोभनरङ्गावल्ली इत्यादिभिः सुन्दरतया सज्जीकुर्युः, यस्माच्च गृहस्य सुन्दराकर्षणम् इतोऽपि वर्धेत । अनेन वर्षा-ऋतुकारणतः समागतायाः अस्वच्छतायाः अपि परिमार्जनं सम्भवेत् ।

दीपावलीदिवसे धनसम्पददादीनाम् अधिष्ठात्रीदेव्याः भगवती-महालक्ष्म्याः विधिपूर्वकं पूजा विधीयते । शास्त्रकथनं यत् या व्यक्तिः दीपावल्यवसरे अहर्निशं जागरणपूर्वकं श्रीलक्ष्मीपूजाम् आचरति, तस्याः गृहे धनधान्यसम्पदादीनाम् अधिष्ठात्रीदेवी श्रीलक्ष्मीर्निवसति । परन्तु यदि यः कोऽपि आलस्येन, निद्राग्रस्ततया च तद्दिनं व्यर्थं हि यापयति, तर्हि तस्य गृहात् लक्ष्मीः कोपं प्राप्य निर्गच्छेत्, तथा च स जनः सदा हि दरिद्रतायाः मुखं हि पश्येत् ।

ब्रह्मपुराणे लिखितमस्ति यत् कार्तिकमासस्य अमावस्यायाः अर्धरात्रिवेलायां श्रीलक्ष्मीः महाराज्ञी सद्गृहस्थानां निवासगृहेषु यत्र तत्र विचरति इति । अत एव स्वगृहं सर्वप्रकारेण स्वच्छम्, शुद्धम्, सुशोभितञ्च कार्यम् । दीपावली, दीपमालिका वा यदि सम्यक्तया आदरपूर्वकञ्च यदि आचर्यते तर्हि लक्ष्मीः प्रसन्ना भवति, तद्गृहे, स्थाने वा सा स्थायिरूपेण निवसति । इयम् अमावस्या प्रदोषकालतः अर्धरात्रिं यावत् श्रेष्ठा कथ्यते । यदि अर्धरात्रिपर्यन्तं तन्न सम्भवेत् तर्हि प्रदोषव्यापिनी दीपावली आचरणीया ।


प्रायः प्रत्येकं गृहेषु जनाः रीतिपरम्परानुसारं गणेश-लक्ष्मीपूजनम्, द्रव्यलक्ष्मीपूजनञ्च आचरन्ति । कुत्रचित् केचन विभिन्नवर्णलेखनेन चित्रं निर्मीय, अथवा लक्ष्मी-गणेशयोः मृन्मूर्तिं विधाय, रजतनाणकं वा संस्थाप्य तयोः पूजनं कुर्वन्ति । केचन स्थाल्यां त्रयोदश अथवा त्रयोविंशति सङ्ख्यकान् दीपान् प्रज्वाल्य, तेषां मध्ये एकं चतुर्मुखं दीपं संस्थाप्य दीपमालिकायाः पूजनं कुर्वन्ति, पूजनान्तरं गृहप्राङ्गणस्य मुख्यस्थानेषु एकैकशः तान् संस्थापयन्ति च । चतुर्मुखदीपकः आरात्रिं ज्वालयेयुस्ते इतीयं परम्परा अस्मिन् पर्वणि लक्ष्मीपूजायाः स्वच्छतया हि वा प्रशस्तिर्वर्तते, न वा नानास्फोटकसामग्रीभिः वायुरवादीनां प्रदूषणाय अस्य पर्वणो महत्त्वं स्यादिति । शुभम् ।

# गुजरातप्रान्ते शिवपुरीस्थे जय जालाराम- आयुर्वेदिक-चिकित्सालय- महाविद्यालये एवं चिकित्सालये धन्वन्तरिपूजनं, १०८ श्रीसूक्तहवनं च श्रद्धाभक्तिपूर्वकं सम्पन्नम्



**हिमसंस्कृतवार्ताः-** गुजरातप्रान्तस्य शिवपुरीस्थे जय- जालाराम- आयुर्वेदिक- चिकित्सालय- महाविद्यालये एवं चिकित्सालये धन्वन्तरिपूजनं, १०८ श्रीसूक्तहवनं च श्रद्धाभक्तिपूर्वकं सम्पन्नम्। अस्य पवित्रसन्दर्भे समस्ताः अध्यापकवृन्दाः, वैद्यविद्यार्थिनः, कर्मचरिणश्च सानन्दं सहभागिनः अभवन्। मुख्यपूजाविधानं परविनभाईपटेलमहोदयेन स्वहस्तेन सम्पन्नम्। तेन वेदमन्त्रैः सह भगवतः धन्वन्तरिणः आह्वानं, पूजनं च कृत्वा १०८ श्रीसूक्तपाठेन सह हवनकर्म सम्पन्नम्। यज्ञमण्डले सुगन्धद्रव्यैः, नवकुसुमैः, तिलककडीद्वारा सम्यक् आहुतयः दीयन्ते स्म। कार्यक्रमे सर्वैः उपस्थितैः "आरोग्यं सर्वस्य भूतानाम्" इत्यस्य संकल्पस्य अनुसरणं कृतम्। अन्ते सर्वे जनाः धन्वन्तरिदेवस्य कृपां प्रार्थयन्तः आयुर्वेदसेवायां नूतनम् उत्साहं प्राप्य हर्षं प्रकटितवन्तः। इति कार्यक्रमः संस्कृतक्लब तथा संहिता–सिद्धान्तविभागयोः डॉ. चिराग पुरोहितस्य, सर्वेषां संयुक्तप्रयत्नेन च सुसम्पन्नः अभवत्।

# दीपावल्याः विधिनिषेधौ कर्मकालश्च



**आचार्यः राजेश बेंजवालः,**
**कामख्या- अर्धत्र्यम्बकमठः,**
**तंत्रकुलसंस्थापकः, तंत्रकुलस्य**
**१५,००० वर्षीय-पञ्चाङ्गकर्ता**

हिमसंस्कृतवार्ताः- धनत्रयोदश्यां प्रातःकाले स्नात्वा दन्तधावनं कर्तव्यम्। श्लोकानुसारं "त्रिरात्रं नियमं कृत्वा गोविन्दे भक्तितत्परः॥
अयं त्रिरात्रं नियमः अत्यन्त फलप्रदः। संध्याकाले यमदीपं प्रज्वाल्य बलिदानं कर्तव्यम् मन्त्रः–
> "मृत्युना पाशदण्डाभ्यां कालेन च मया सह।
त्रयोदश्यां दीपदानात् सूर्यजः प्रीयतामिति॥"
दीपदानम् अभ्यंगस्नानं च अनिवार्यम्।

**कालीचतुर्दशी**– रविवासरः, 19 अक्टूबर रात्रिः 11:38– 12:28 महाशक्तिसंध्या। शक्तिपूजापरायणैः काली पूज्यते।
> "महारात्रिः समुत्पन्ना चतुर्दश्यां मुनीश्वराः।
अतस्तदुत्सवः कार्यः शक्तिपूजापरायणैः॥


**नरकचतुर्दशी एवं दीपावली–** सोमवासरः, 20 अक्टूबर प्रातः 05:10– 06:23 अभ्यंगस्नानमुहूर्तः। स्नानकाले अपामार्गं तुंबीं च शिरसः उपरि त्रिवारं घूर्णयित्वा मन्त्रपाठः–
> "सीतालोटसमायुक्त! सकण्टकदलान्वित!
हर पापमपामार्ग! भ्राम्यमाणः पुनः पुनः॥
स्नानानन्तरं यमतर्पणं कर्तव्यम्–
> "यमाय धर्मराजाय मृत्यवे चाऽन्तकाय च।
वैवस्वताय कालाय सर्वभूतक्षयाय च॥ ३९॥"
संध्याकाले 07:01 – 08:14 लक्ष्मीपूजनम्। स्वच्छं मण्डपं संस्थाप्य पुष्पैः, पल्लवैः, वस्त्रैः लक्ष्मीः पूज्यते। सुखसुप्तिका यथा– श्वेतवस्त्रैः शय्या।
नैवेद्यम्– गव्यमध्ये जातिपत्रं, लवङ्गम्, ऐला, कर्पूरम् आदीनि मिश्रयित्वा लड्डुकं समर्पयेत्। प्रदोषे दीपदानम्– गृहे, मंदिरे, चतुष्पथि, नद्यां, पर्वते, वृक्षे च। रात्रौ नगरनार्यः शूर्प-डिण्डिमवादनम् अलक्ष्मीं निष्कासयेत्।
> "एवं गते निशीथे च जने निद्रार्द्धलोचने।
निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाऽङ्गणात्॥
पितृणाम्- अमावस्या एवं भैलो इति– मंगलवासरः, 21 अक्टूबर
प्रातःकाल स्नात्वा देवानां, पितृणां पूजनं च। पार्वणश्राद्धं दधिक्षीरघृतादिभिः। प्रदोषे तुला स्थाप्य हस्तो दीपकः, पितृ मार्गदर्शनम्।
> "तुलासंस्थे सहस्रांशौ प्रदोषे भूत दर्शयोः॥ ६६॥"

**बलिपूजा, गोवर्धनपूजा** एवं द्यूतक्रीड़ा– बुधवासरः, 22 अक्टूबर
पूजनीयः बलिराज्य उत्सवः। श्लोकः –
> "दत्तं दैत्यपतेरित्थं हरिणा तद्दिनत्रयम्।
तस्मान्महोत्सवं चाऽत्र सर्वथैव हि कारयेत्॥
रात्रौ पुराणपठनं, द्यूतेन वा क्रीडा, किन्तु जीवहिंसा, मद्यपानम्, अवैधसम्बन्धश्चौर्यं, विश्वासघातश्च त्यज्यन्ताम्।
> "जीवहिंसा सुरापानमगम्यागमनं तथा।
चौर्यं विश्वासघातश्च पञ्चैतानि मुनीश्वराः!॥
यमद्वितीया/ भ्रातृद्वितीया– गुरुवासरः, 23 अक्टूबर अपराह्णे 01:09– 03:24 तिलकमुहूर्तः मंगलस्नानं च।
> "यदा स्नाति तदाऽभ्यङ्गस्नानं कुर्याद्विधूदये॥ ४५॥"
गोवर्धनपूजा प्रातः 06:25– 08:40वादने सायंकाले 03:25– 05:39 वादने च भ्रातृभगिनीभ्यां सम्बद्धं परम्परागतं मंगलकर्म संपन्नम्।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

# दीपावल्याः भ्रातृद्वितीयायाश्च पुण्यपर्वणः सर्वेभ्यः शुभकामनाः












दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

# दीपावल्याः भ्रातृद्वितीयायाश्च पुण्यपर्वणः सर्वेभ्यः शुभकामनाः





















हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

# दीपावल्याः भ्रातृद्वितीयायाश्च पुण्यपर्वणः सर्वेभ्यः शुभकामनाः




## शुभं भूयात् दीपोत्सवः

### हिमसंस्कृतवार्तायाः कार्यालयीयः गणः




































दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

# दीपावल्याः भ्रातृद्वितीयायाश्च पुण्यपर्वणः सर्वेभ्यः शुभकामनाः























दीपावल्याः भ्रातृद्वितीयायाश्च
पुण्यपर्वणः सर्वेभ्यः शुभकामनाः
डॉ.मनोजशैलः
संरक्षकः
श्रीललितशर्मा
संगठनमन्त्री
शुभ दीपावली
प्रदेशाध्याध्यक्षः
डॉ. कमलकान्तगौतमः
शुभ दीपावली
महासचिवः
डॉ.अमनदीपशर्मा
शुभ दीपावली
वित्तसचिवः
श्रीलोकपालः
शुभ दीपावली
डॉ. अशोक कुमार
अध्यक्षः जिला बिलासपुरम्
डॉ. प्रेमप्रकाशः
अध्यक्षः जिला शिमला
डॉ. जंगछुबनेगी
अध्यक्षः जिला किन्नौरः
श्री हीरालालः
अध्यक्षः जिला कुल्लुः
॥शुभ 卐 लाभ॥
आचार्यः देवेन्द्रशर्मा
अध्यक्षः जिला सिरमौरः
श्रीराजकुमारः
अध्यक्षः जिला सोलनम्
श्रीदीपकुमारः
अध्यक्षः जिला कांगड़ा
श्री हेमसिंहः
अध्यक्षः जिला चम्बा
॥शुभ 卐 लाभ॥
श्री नरेशमलोटिया
अध्यक्षः जिला हमीरपुरम्
श्री सुरेशबौद्धः
अध्यक्षः लाहौल-स्पीतिः
श्री देवन्द्रकुमारः
उपाध्यक्षः जिला मण्डी
श्रीअरुणकुमारः
अध्यक्षः जिला ऊना
हिमाचल-राजकीय-संस्कृत-शिक्षक-परिषद्

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

# दीपावल्याः भ्रातृद्वितीयायाश्च पुण्यपर्वणः सर्वेभ्यः शुभकामनाः

शुभं भूयात् दीपोत्सवः
श्रीमति दीपिका शर्मा
प्रदेशमहिला संयोजिका
हिमाचल-राजकीय-संस्कृत-शिक्षक-परिषद्



मम भाषा संस्कृतम्
आचार्य देवेन्द्र शर्मा
जिला अध्यक्ष
हिमाचल-राजकीय-संस्कृत-शिक्षक-परिषद्
जिला सिरमौरः





शुभं भूयात् दीपोत्सवः
डॉ. वर्षा प्रकाशः टोणगांवकर
पुणे / महाराष्ट्रम्
शुभ दीपावली

दीपोत्सवस्य शुभाश्याः
डॉ.निशिकान्तपाण्डेयः
हिमसंस्कृतवार्ताः
ग्रामः -रामचन्द्रपुरः
जनपदः - मालदा
राज्यम् - पश्चिमबङ्गः



शुभं करोति कल्याणमरोग्यं धनसंपदाम् ।शत्रुबुद्धिविनाशय दीपज्योतिर्नमोऽस्तुते ॥
दीपोत्सवस्य शुभाश्याः
संस्कृतभारती हिमाचलप्रदेशः




दीपोत्सवस्य शुभाश्याः
श्रीमति शिवानी शर्मा
प्रबन्धनिदेशिका
हिमसंस्कृतम् प्रकाशनम्

निगमागमप्रतिष्ठानम् (न्यासः)
सर्वेभ्यः दीपावल्याः शुभकामनाः

साई गोकुलम्,बनूड़ी
श्री लक्ष्मी नारायणगौरक्षासेवा समिति बनूड़ी गौशाला पक्षतः
सर्वेभ्यः दीपावल्याः शुभकामनाः
शुभ दीपावली